त्राऽन्या कर्त्तव्या विघ्नशान्तये । दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः । गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः । अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषतः । दृश्यान्येतानि लिङ्गानि महापापोपशान्तये । अपरापि शुभा यात्रा योगक्षेमकरी सदा । सर्व्वविघ्नोपहन्त्री च कर्त्तव्या क्षेत्रवासिभिः । शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्व्वकम् । स्नानं तु सङ्गमे कृत्वा द्रष्टव्यः सङ्गमेश्वरः । स्वर्लीनतीर्थे सुस्नातः पश्येत् स्वर्लीनमीश्वरम् । स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः । पश्येद्धिरण्यगर्भेशं तत्र तीर्थे कृतोदकः । मणिकर्ण्यां ततः स्नात्वा पश्येदीशानमीश्वरम् । उपशान्तशिवं पश्येत् तत्कूपविहितोदकः । पञ्चचूडाह्रदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् । चतुःसमुद्रकूपे तु स्नात्वा देवं समर्च्चयेत् । देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते । शुक्रेश्वरं ततः पश्येत् तत्कूपविहितोदकः । दण्डखाते ततः स्नात्वा व्याघ्रेशम्पूजयेत्ततः । शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् । जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः । क्वचिन्न जायते भूयः संसारे दुःखसागरे । समारभ्य प्रतिपदं यावत् कृष्णचतुर्दशीम् । एतत् क्रमेण कर्त्तव्यान्येतदायतनानि वै । इमां यात्रां नरः कृत्वा न भूयोऽप्यभिजायते । अन्या यात्रा प्रकर्त्तव्यैकादशायतनोद्भवा । अग्नीध्रकुण्डे सुस्नातः पश्येदग्नीध्रमीश्वरम् । उर्व्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् । आषाढीशं ततो दृष्ट्वा भारभूतेश्वरं ततः । लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् । ततो मनःप्रकाशेशं प्रतीकेशमथो व्रजेत् । मदालसेश्वरं तस्मात्तिलपर्णेश्वरं ततः । तत्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः । इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः । अतःपरं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् । शुक्लपक्षे तृतीयायां सा यात्रा विष्वगृद्धिदा । गोप्रेक्ष्यतीर्थे सुस्नाय मुखनिर्मालिकां व्रजेत् । ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् । सौभाग्यगौरी संपूज्या ज्ञानवाप्यां कृतोदकैः । ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः । स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् । सुस्नातो ललितातीर्थे ललितामर्च्चयेत्ततः । स्नात्वा भवानीतीर्थेऽथ भवानीं परिपूजयेत् । मङ्गला च ततोऽभ्यर्च्च्या विन्दुतीर्थकृतोदकैः । ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये । इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन् मुक्तिजन्मनि । न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् । कुर्य्यात् प्रतिचतुर्थीह यात्रां विघ्नजितः सदा । ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदे । भौमे भैरवयात्रा च कार्य्या पातकहारिणी । रविवारे रवेर्यात्रा षष्ठ्यां वा रविसंयुजि । तत्रैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये । नवम्यामथ वाष्टम्यां चण्डीयात्रा शुभावहा । अन्तर्गृहस्य वै यात्रा कर्त्तव्या प्रतिवत्सरम् । प्रातः स्नानं विधायादौ नत्वा पञ्च विनायकान् । नमस्कृत्याथ विश्वेशं स्थित्वा निर्व्वाणमण्डपे । अन्तर्गृहस्य यात्रां वै करिष्येऽघौघशान्तये । गृहीत्वा नियमं चेति गत्वाथ मणिकर्णिकाम् । स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् । कम्बलाश्वतरौ नत्वा वासुकीशमर्च्च्य च । पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशवमप्यथ । ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः । ततो वै सोमनाथञ्च वाराहञ्च ततो व्रजेत् । ब्रह्मेश्वरं ततो नत्वा नत्वागस्तीश्वरं ततः । कश्यपेशं नमस्कृत्य हरिकेशवनं ततः । वैद्यनाथं ततो दृष्ट्वा ध्रुवेशमथ वीक्ष्य च । गोकर्णेश्वरमभ्यर्च्च्य हाटकेशमथो व्रजेत् । अस्थिक्षेपतडागेऽथ दृष्ट्वा वै कीकसेश्वरम् । भारभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः । चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् । चन्द्रेशश्चाथ वीरेशो विद्येशोऽग्नीश एव च । दिवामहेश्वरं नत्वा ततस्तु कलसेश्वरम् । नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः । सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वविघ्नहृत् । वशिष्ठवामदेवौ च मूर्त्तिरूपधरावुभौ । द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशकौ । सीमाविनायकं चाथ करुणेशं ततो व्रजेत् । त्रिसन्ध्येशो विशालाक्षी धर्म्मेशो विश्वबाहुका । आशाविनायकश्चाथ वृद्धादित्यस्ततः पुनः । चतुर्व्वक्त्रेश्वरं लिङ्गं ब्राह्मीशश्च ततः परम् । ततो मनःप्रकाशेशं ईशानेशस्ततः परम् । चण्डीचण्डीश्वरौ दृश्यौ भवानीशङ्करौ ततः । ढुण्ढिं प्रणम्य च ततो राजराजेशमर्च्चयेत् । लाङ्गलीशस्ततोऽभ्यर्च्च्यस्ततस्तु नकुलीश्वरः । परान्नेशमथो नत्वा परद्रव्येश्वरं ततः । प्रतिग्रहेश्वरं चापि निष्कलङ्केशमेव च । मार्कण्डेयेशमभ्यर्च्च्य तत आप्सरसेश्वरम् । गङ्गेशोऽर्च्च्यस्ततो ज्ञानवाप्यां स्नानं समाचरेत् । नन्दिकेशं तारकेशं महाकालेश्वरं ततः । दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत् ततः । वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः । विना-